सप्तदशः पाठः

# दास्यापनोदनम्

आधुनिकसंस्कृतसाहित्यकारेषु अभिराजो डॉ. राजेन्द्रमिश्रः अतीवप्रसिद्धः लोकप्रियश्च । अस्य नाट्यपञ्चामृतमितिग्रन्थे विद्यते पञ्चैकाङ्किनाटकानां समवायः । तस्मादेव एषः पाठः सङ्ग्रहीतः । पुराणप्रसिद्धम् इतिवृत्तमाधृत्य अत्र सपत्न्या कृतं स्वमातुः दासीभावं ज्ञात्वा गरुडः पणेन इन्द्रात् अमृतं लब्ध्वा कद्रूपुत्रान् नागान् समर्प्य दास्यात् तां मुक्तिं ददाति ।

## पात्रपरिचयः

विनता - सुपर्णजननी
सुपर्णः - पक्षिराजोगरुडः
पुरन्दरः - अमरावतीश्वरः इन्द्रः

### नाद्यन्ते

(नेपथ्ये विवादस्वरोऽनुश्रूयते)

प्रथमस्वरः - त्वमेवाऽस्माकं दासोऽसि ।
द्वितीयस्वरः - अपेहि रे दुर्विष ! को न खलु मां वैनतेयं दासीकर्तुं समर्थः ?
प्रथमस्वरः - अलं सन्तप्य । गच्छ तावन्निजाम्बामेव पृच्छ ।
द्वितीयस्वरः - यद्यम्बा न तथा भणति, ततो त्रोटयिष्यामि ते कुब्जदन्तान् ।
प्रथमस्वरः - (साट्टहासम्) गच्छ रे दासीपुत्र ! पृच्छ तावत् ।

### प्रथमं दृश्यम्

(ततः प्रविशति गृहकर्मव्यापृतमानसा मलिनवेषा वेपथुमती विनता सुपर्णेन अनुगम्यमाना)

सुपर्णः - (साङ्गुलिग्राहम्) ब्रूहि रे अम्ब ! किं त्वमसि दासी ?
विनता - जात ! न खलु । किमर्थमेवं पृच्छसि ?
सुपर्णः - (समानरोषम्) अलीकं भणसि । सत्यमद्यैव ज्ञास्यामि । अम्ब ! कथय ।
विनता - (साश्रुनयना स्वगतम्)
मन्येऽद्य दारकः केनापि नागापसदेनाधिक्षिप्तः । भवतु, एवमेनं तोषयामि ।

(प्रकाशम्)

सुपर्ण ! वत्स ! कथितं मया । न कस्यापि दासी तव जननी ।

**सुपर्णः** – (सक्रोधम्) मत्तोऽपि वारयसि। अम्ब ! किञ्चित् हृदये कृत्वाऽऽन्यथा मन्त्रयसे।

**विनता** – (अश्रूणि प्रमृज्य) वत्स, सुपर्ण ! एकदाऽहं नागजननी कद्रूश्च ते विमाता विलासवनिकायां विहरन्त्यावभवाव।

**सुपर्णः** – अम्ब ! ततः किमभूत् ?

**विनता** – जात ! तदा सपत्न्या कद्र्वा पृष्टं, सखि विनते ! जानासि भगवतो मरीचिमालिनः सप्ताश्वानां वर्णम्।

**सुपर्णः** – किं त्वया भणितं तदा ?

**विनता** – जात ! ते पितु महर्षिकश्यपस्यैव सेवाप्रसादात् अधिगत सकलज्ञानविज्ञानाऽहं तत्क्षणमेवाकथयं श्वेतवर्णाः दिवस्पतेरश्वा इति।

**सुपर्णः** – अवितथं त्वयोक्तमम्ब ! विमात्रा तावत्किं भणितम् ?

**विनता** – वत्स ! निसर्गादेव मत्सौभाग्यमसहमानया तया कृष्णवर्णा इत्युक्तम्।

**सुपर्णः** – सर्वथा न युज्यते। धवल धवला एव वर्तन्ते रविवाजिनः।

**विनता** – विवादस्तावद् वृद्धिङ्गतः। मया प्रदत्तानि सर्वाण्येवाप्तजनप्रमाणानि कद्र्वा निरस्तानि। अन्ते तया पणबन्धो विहितः।

**सुपर्णः** – कीदृशः पणः ! अम्ब !

**विनता** – वत्स ! तयोक्तम्,

**यदि रविहयवर्णः पाण्डुतामेति भद्रे, तव चरणसपर्यां जीवनान्तं विधास्ये।**
**गतवति ननु वृत्ते वैपरीत्यं परन्तु, त्वमपि मम निदेशे मृत्युपर्यन्तमेषि॥**

**सुपर्णः** – हन्त भोः ! अज्ञानोपहता नागजनन्याः बुद्धिः। अम्ब ! किं कृतं त्वया ?

**विनता** – जात ! स्वकीयेनैव सत्येन छलिताऽहम्। पुत्रमुखेभ्यः रविहयानां श्वेतवर्णतां विज्ञाय परिभवभयाद् वेपमानया कद्र्वा अभ्यर्थिताः नागाः स्व वचनरक्षायै। ततश्च,

**मध्याह्ने व्योम्नि नीले दिनमणितुरगाः यावदेवागतास्ते।**
**कद्रूपुत्रैरकस्मादुपचिततनुकाः कृष्णवर्णाः बभूवुः॥**

**सुपर्णः** – (सक्रोधम्)
अरे रे भाग्यहतकाः कद्रूपुत्राः ! पापमाश्रित्य मुधा गर्जथ ? विज्ञातं मया युष्माकं प्रभुत्वमिदानीम्। (भैरवाकृतिं नाटयन्) अरे रे ! पापाः कद्रूपुत्रकाः ! पश्याम्यहम् ? योऽहं वैनतेयः (द्रुतगत्या धावन्) एष आगतोऽस्मि।

**(इति सझम्पं निष्क्रान्तः)**

**विनता** – जात, सुपर्ण ! मा खलु आत्मानं विपत्पङ्के निपातय !

**(जवनिकापातः)**

## द्वितीयं दृश्यम्

(नेपथ्ये कोलाहलध्वनिः घातप्रतिघातचीत्काराश्च प्रवर्धन्ते)

**पुरन्दरः** - (प्रविश्य) अरे रे विहगापसद कुलपांसन ! न जानासि मे देवराजस्य बाहुपराक्रमम्।

(साट्टहासम्)

**सुपर्णः** - (साट्टहासम्) अलमात्मानं प्रख्याप्य ! समरभूमावेव तव पराक्रमं पश्यामि।

**पुरन्दरः** - अहो, दर्प ! वैधेय वैनतेय, त्वं पुनर्वासवमपि मां विहगी करोषि ? (वज्रमनुसन्धाय) एष न भवसि। रक्षात्मानम् इदानीम्।

**सुपर्णः** - (आकाशे समुत्प्लुत्य वज्रं चञ्चुप्रहारेण खलीकृत्य साट्टहासम्) महावीर शचीप्रणयिन्, वर्तते किमप्यपरं कौशलम् ?

**पुरन्दरः** - आश्चर्यम्, दुर्धर्षामोघविक्रमं वज्रमपि न प्राभवत्। साम्प्रतं किं कर्तुं युज्यते ?

(सविस्मयं विलोक्यान्तरिक्षम्)

अये युद्धनिवारणाय समुपस्थितः साक्षात् भगवान् पद्मयोनिः।

(प्रकाशम्)

प्रभो त्रिभुवनैकगुरो ! एष निवृत्तोऽस्मि युद्धात्

(पुनर्नेपथ्ये)

वत्स विनतानन्दन ! त्वमपि निवर्तयात्मानम्।

**सुपर्णः** - (सविनयम्) तात ! पितामहचरण !! गरीयसी ते आज्ञा प्राणेभ्योऽपि। एष आत्मानं निवारयामि।

(पुनर्नेपथ्ये)

शतक्रतो ! नारायणवाहनोऽयं पक्षिराजः गरुडः न त्वया न्यक्करणीयः। प्रसादयैनं पीयूषकुम्भं समुपायनीकृत्य। मया पुनरीदृशं विधानं कृतं येन सुपर्णमातुः दास्यभावमपि नङ्क्ष्यति, दुर्मतिभिर्नागैरमृतमपि नोपलप्स्यते।

**पुरन्दरः** - यथाह भगवान् विरञ्चिः।

(पीयूषकुम्भं हस्तयोर्निधाय सस्नेहम्)

भद्र ! कश्यपनन्दन ! मदुपकारिन्। गृहाण मदुपायनमिदम्।

सुधाकुम्भमिमं दत्वा मातरं विशदां कुरु।
यदिच्छामि शुभं भूयाद् भूयाद्दास्यापनोदनम्॥

**सुपर्णः** - सुरपते ! जनन्याः दास्यभावापनोदनाय नागान् सुधाकुम्भदानेन परितोषयितुम् कृतप्रतिज्ञेन मया क्लेशितोऽत्रभवान्।

(इति सादरं पीयूषघटं गृह्णाति)

**(इति निष्क्रान्ताः सर्वे)**

## शब्दार्थः

अपनोदनम् - निवारणम्, मोचनम् (दूर करने के लिए)। अपेहि - दूरीभव। वैनतेयम् - गरुडम्। व्यापृतम् - कार्येलग्नम्। वेपथुमती - कम्पमाना। अलीकम् - मिथ्याकथनम्। प्रमृज्य - निवार्य। मरीचिमालिनः - सूर्यस्य। प्रख्याप्य - उक्त्वा। वासवम् - इन्द्रम्। समुत्प्लुत्य - उत्प्लवनं विधाय। साम्प्रतम् - इदानीम्। पद्मयोनिः - ब्रह्मा। निवर्तय- निवारय। प्रसादय - मोदय। उपायनम् - उपहारस्वरूपम्।

# अभ्यासः

1. **एकपदेन उत्तरत -**
   - (क) विनतायाः पुत्रः कः ?
   - (ख) का विनतायाः सपत्नी ?
   - (ग) नागजनन्याः नाम किमासीत् ?
   - (घ) विनतानुसारं मरीचिमालिनः सप्ताश्वानां वर्णः कीदृशः ?
   - (ङ) पुरन्दरः सुपर्णाय उपायनरूपे किं ददाति ?

2. **एकवाक्येन उत्तरत -**
   - (क) कद्रूविनतयोः मध्ये कः पणबन्धो विहितः ?
   - (ख) कद्रूः कस्य विमाता आसीत् ?
   - (ग) 'वैनतेयः' इति पदं कस्य कृते प्रयुक्तम् ?
   - (घ) सूर्यस्य रथे कति अश्वाः सन्ति ?
   - (ङ) सुपर्णस्य युद्धः केन सह जातः ?

3. **त्रिचतुर्भिर्वाक्यैः उत्तरत -**
   - (क) विनता मरीचिमालिनः अश्ववर्णविषये किमकथयत् ?
   - (ख) कद्रूः दिवस्पतेरश्ववर्णविषये किमुक्तवती ?
   - (ग) कद्र्वा कः पणिबन्धोः कृतः ?
   - (घ) परिभवभयात् कद्र्वा अभ्यर्थिताः नागाः किमकुर्वन् ?
   - (ङ) जनन्याः दास्यभावापनोदनाय सुपर्णः किमकरोत् ?

4. **युग्ममेलनं कुरुत -**

| | 'अ' | 'आ' |
|---|---|---|
| (क) | नारायणवाहनः | ब्रह्मा |
| (ख) | पद्मयोनिः | अश्वाः |
| (ग) | सुरपतिः | गरुडः |
| (घ) | श्वेतवर्णाः | कद्रूः |
| (ङ) | नागजननी | इन्द्रः |

5. **उचितशब्दं लिखत -**

'अ' — **सुपर्णस्य**

'आ'

- विमाता ........................ ।
- माता ........................ ।
- शत्रवः ........................ ।
- प्रतिपक्षी योद्धा ........................ ।
- युद्धनिवारकः ........................ ।

6. **अधोलिखितपदानां विभक्तिं वचनं च लिखत –**

| पदम् | विभक्तिः | वचनम् |
|---|---|---|
| (क) मया | | |
| (ख) सेवाप्रसादात् | | |
| (ग) मरीचिमालिनः | | |
| (घ) वचनरक्षायै | | |
| (ङ) मध्याह्ने | | |

7. **अधोलिखितक्रियापदानां धातुं पुरुषं वचनं च लिखत –**

| क्रियापदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| (क) ब्रूहि | | | | |
| (ख) वारयसि | | | | |
| (ग) अकथयम् | | | | |
| (घ) प्रवर्धन्ते | | | | |
| (ङ) निपातय | | | | |

8. **प्रकृतिप्रत्यौ पृथक् कुरुत –**

(क) अनुगम्यमाना

(ख) कृत्वा

(ग) भणितम्

(घ) विज्ञाय

(ङ) करणीयः

9. **अधोलिखितपदानां समानार्थिपदं लिखत –**

(क) सूर्यः

(ख) अश्वः

(ग) इन्द्रः

(घ) गरुडः

(ङ) ब्रह्मा

10. **अस्य नाट्यांशस्य कथावस्तु संस्कृतभाषयां संक्षेपेण लिखत ?**

**योग्यताविस्तारः –**

- नाट्यपञ्चामृतस्य अन्यानि नाटकानि पठत।